# ಕರ್ನಾಟಕ ಪ್ರೌಢಶಿಕ್ಷಣ ಪರೀಕ್ಷಾ ಮಂಡಳಿ

ಮಲ್ಲೇಶ್ವರಂ, ಬೆಂಗಳೂರು–560003.

# KARNATAKA SECONDARY EDUCATION EXAMINATION BOARD

Malleshwaram, Bengaluru – 560003.

## ಮಾದರಿ ಪ್ರಶ್ನೆ ಪತ್ರಿಕೆ 2021-22
## MODEL QUESTION PAPER 2021-22

| | |
|---|---|
| **ವಿಷಯ : ಪ್ರಥಮ ಭಾಷೆ – ಸಂಸ್ಕೃತ** | **ವಿಷಯ ಸಂಕೇತ : 16-S** |
| **Subject : FIRST LANGUAGE SANSKRIT** | **Subject Code : 16-S** |
| **ಅವಧಿ : 3 ಗಂಟೆ 15 ನಿಮಿಷಗಳು** | **ಗರಿಷ್ಠ ಅಂಕಗಳು : 100** |
| **Time : 3 hrs. 15 minutes** | **Max. Marks : 100** |

**ಶಾಲಾ ಅಭ್ಯರ್ಥಿಗಳಿಗೆ**

**Regular Fresh**

---

## परीक्षार्थिनां सामान्यसूचना:

1) अस्मिन् प्रश्नपत्रे पञ्चचत्वारिंशत् (45) वस्तुनिष्ठा: विषयनिष्ठाश्च प्रश्ना: सन्ति।

2) इदं प्रश्नपत्रं विपरीतेन आवरणेन मुद्रिताङ्कमस्ति। परीक्षासमये प्रश्नपत्रमुद्घाटयितुं दक्षिणपार्श्वेन कर्तयत। प्रश्नपत्रस्य पृष्ठानि पूर्णानि सन्ति वा इति पर्यालोचयत।

3) वस्तुनिष्ठानां विषयनिष्ठानां च प्रश्नानां विषये निर्दिष्टा: नियमा: अनुपालनीया:।

4) प्रश्नानां प्रति अधिकृता: अङ्का: पार्श्वे लिखिता: सन्ति।

5) प्रश्नपत्रमुत्तरयितुं निर्धारित: समयावधि: प्रश्नपत्रस्य उपरि भागे लिखित: अस्ति। पञ्चदशनिमेषा: प्रश्नपत्रस्य पठनार्थं निर्धारिता: सन्ति।

**I. अधोलिखितेभ्यः प्रश्नेभ्यः चत्वारः विकल्पाः प्रदत्ताः। तेषु समुचितं विकल्पं चित्वा क्रमाक्षरेण सह लिखत।** **6 x 1 = 6**

1. **'क्षितिपालः' अस्य समानार्थकपदम् इदं भवति ।**

   A. आपः  B. तापः
   C. नृपः  D. तपः

2. **'प्रकाशः' अस्य विरुद्धार्थकपदम् इदं भवति ।**

   A. भ्रमः  B. क्रमः
   C. शमः  D. तमः

3. **'विद्वान्' अस्य स्त्रीलिङ्गरूपम् इदं भवति ।**

   A. विदुषी  B. विदुषिः
   C. विद्वाना  D. विद्वानी

4. **'प्रावर्तत' अत्र एषः लकारः वर्तते ।**

   A. लट्लकारः  B. लङ्लकारः
   C. लोट्लकारः  D. लिट्लकारः

5. **'भाषा' अत्र एषा विभक्तिः वर्तते ।**

   A. प्रथमाविभक्तिः  B. द्वितीयाविभक्तिः
   C. तृतीयाविभक्तिः  D. चतुर्थीविभक्तिः

6. **'भाग्यानि <u>काले</u> फलन्ति' अत्र रेखाङ्कितपदस्य समुचितं प्रश्नवाचकपदम् इदं भवति ।**

   A. कुतः  B. कुत्र
   C. कति  D. कदा

**II. चतुर्थ पदं लिखत।** **4 x 1 = 4**

7. दधीचिः – महर्षिः :: वृत्रासुरः – ........................
8. राजारामः – शरणागत :: मोघलसेना – ...........................
9. नद्यः – समुद्रेऽस्तं गच्छन्ति :: विद्वान् – ..............................
10. आदित्यस्य नमस्कारात् – दीर्घमायुर्बलम् :: नित्यस्नानेन – ................................

**III. एकवाक्येन उत्तरं लिखत।** **7 x 1 = 7**

11. इन्द्रः कस्य तपोवनं वव्राज?
12. बाल्ये सत्यव्रतशास्त्रिमहोदयस्य गृहपरिसरः कथम् आसीत्?
13. भोजः कुत्र हन्तव्यः?
14. लोकः केन ग्रथितः?
15. नाट्ये कति रसाः स्मृताः?
16. आहारार्थं किं कुर्यात्?
17. हिमलिङ्गं कदा दर्शनयोग्यं भवति?

**IV. दित्रैः वाक्यैः उत्तरं लिखत।** **4 x 2 = 8**

18. पादपजातयः काः? तासां जन्म कथं भवति?
19. प्रजाभिप्रायं स्वीकृत्य चन्नम्मा राजारामं किम् अब्रवीत्?
20. कविः कीदृशीं मातरं नमामि इति वदति?
21. भरतखण्डः तिसृषु दिक्षु कैः आवृतः? नगाधिराजः कः?

**V. सूचनानुसारम् उत्तरं लिखत।** **4 x 2 = 8**

22. सन्धिं विभज्य नाम लिखत।

    a) चराचरम्

    b) मुनिरिति

23. विग्रहवाक्यं विलिख्य समासनाम लिखत।

a) नीलकण्ठः

b) देशान्तरम्

**अथवा**

समासं कृत्वा समासनाम लिखत।

a) करीणाम् इन्द्रः =

b) वर्षं वर्षं प्रति =

24. वाक्ये विद्यमानं कृदन्तपदं चित्वा प्रत्ययस्य नाम लिखत।

a) नगरे शोभमानम् उपवनं भवति।

b) छात्रः अध्येतुं शालां गच्छति।

25. वाक्यदोषं परिहरत –

a) बालकं मोदकं रोचते।

b) नगरस्य बहिः उद्यानम् अस्ति।

**VI. संस्कृतभाषया अनुवादं कुरुत।** **1 x 2 = 2**

26. ಸ್ವಾಮಿ ವಿವೇಕಾನಂದರು ವಿಶ್ವದ ಮಹಾಪುರುಷರಲ್ಲಿ ಒಬ್ಬರು. ಅವರು ದೇಶವಿದೇಶಗಳಲ್ಲಿ 'ಸನಾತನ ಧರ್ಮ'ದ ಪ್ರಚಾರವನ್ನು ಮಾಡಿದರು.

Swamy Vivekananda is one of the greatest personlities in the world. He preached about 'Sanatana Dharma' in India and abroad

**VII. कर्नाटकभाषया आङ्ग्लभाषया वा अनुवादं कुरुत –** **1 x 2 = 2**

27. संस्कृतकविषु कालिदासः **'श्रेष्ठकविः'** इति प्रसिद्धः। तस्य **'अभिज्ञानशाकुन्तलम्'** इति नाटकं विश्वविख्यातं वर्तते।

**VIII. यथानिर्देशम् उत्तरं त्रिचतुरैः वाक्यैः लिखत।** **4 x 3 = 12**

28. ''किं भवेत्? मम समीपे''।

क: पाठः ? कः अवदत्? कम् अवदत्?

29. ''विज्ञानप्रदर्शिनीं द्रष्टुं गच्छाम''।

कः पाठः ? कः वदति? प्रदर्शिनी कुत्र आयोजिता?

30. ''संस्कृतेनैव संस्कृतिरपि सुरक्षिता''।
कः पाठः ? कः अवदत्? केन संस्कृतिः सुरक्षिता?

**अथवा**

''मया भोजो रक्षितः''।

कः पाठः ? कः वदति ? कं वदति?

31. ''जग्राह सहसा रविम्?''

कः पाठः ? कः अवदत्? कम् अवदत्?

**IX. कवेः देश-काल-कृतीनां विषये त्रिचतुरैः वाक्यैः उत्तरं लिखत।** **2 x 3 = 6**

32. विद्वान् एच्. वि. नागराजराव्।

33. भरतमुनिः।

**X. पद्यपाठस्य नाम उल्लिख्य तात्पर्यं पञ्चषैः वाक्यैः कर्नाटकभाषया संस्कृतभाषया आङ्ग्लभाषया वा लिखत।** **3 x 3 = 9**

34. ईशावास्यमिदं सर्वं, यत्किञ्च जगत्यां जगत्।
तेन व्यक्तेन भुञ्जीथाः, मा गृधः कस्यस्विद्धनम्।।

35. यत्र कुत्र वा वयं समग्रभारते स्थिता
भाषयापि धर्मतश्च भिन्नमार्गमाश्रिताः।
आदितश्च मध्यतस्तथान्ततश्च भारता
भारतीयभावनेति वृद्धिमेतु भारते।।

36. ततं चैवावनद्धञ्च घनं सुषिरमेव च।
चतुर्विधञ्च विज्ञेयम् आतोद्यं लक्षणान्वितम्।।

**अथवा**

ऐरावतं ततो दृष्ट्वा महत्तदिदमित्यपि।
फलं मत्वा हस्तिराजमभिदुद्राव मारुतिः।।

**XI. वाक्ये विद्यमानम् अलङ्कारं सलक्षणं समन्वयत।** **1 x 3 = 3**

37. सौजन्यमेव सुवर्णम्।

**अथवा**

सैन्धवमानय।

**XII. प्रस्तारं विलिख्य गणविभागं कृत्वा छन्दोनाम लिखत।** **1 x 3 = 3**

38. प्रलीनभूपालमपि स्थिरायति।

**XIII. पद्यं पूरयत ।** **1 x 4 = 4**

39. मनीषिणः ........................................................................

.................................................................................।

.................................................................................

.................................................................... दुर्लभम्।।

**XIV. दशवाक्यैः उत्तरं कर्नाटकभाषया संस्कृतभाषया आङ्ग्लभाषया वा लिखत।** **3 x 4 = 12**

40. किमर्थं मुञ्जः भोजं मारयितुं प्रयतते?

**अथवा**

वृत्रवधोपायं ज्ञातुम् आगतान् देवान् ब्रह्मदेवः किम् अवदत्?

41. रामायणस्य उत्तरकाण्डे हनूमतः जननं बाल्यवृत्तान्तञ्च अगस्त्यमुनिः कथं विवृणोति?

42. ध्रुवकथां सङ्गृह्य लिखत।

**XV. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नान् उत्तरत।** **1x4=4**

43. पुरा 'रत्नाकरः' इति तस्करः अरण्यप्रदेशेषु वसति स्म। अरण्यमार्गे सञ्चरतां जनानां धनं बलात्कारेण सः अपहरति स्म। एकदा तस्मिन् मार्गे गच्छन्तं नारदं धनार्थं सः अपीडयत्। नारदः तं "तिष्ठ, भोः! चौर्यं हिंसा च पापकारणं भवति। यदि त्वं कुटुम्बस्य पोषणार्थम् एवं करोषि तर्हि तदपि पापकार्यमेव भवति। एतादृशस्य पापकर्मणः फलस्य भोक्ता त्वमेव भवितुम् अर्हसि। किन्तु कुटुम्बजनाः तव पापकर्मणः फलं नेच्छन्ति।" इति अवदत्।

सोऽपि गृहं गत्वा पत्नीपुत्रपित्रादीन् पृच्छति। तदा ते "वयं पापकर्मणः फलम् अनुभोक्तुं न इच्छामः" इति वदन्ति। एतेन परिवर्तितबुद्धिः रत्नाकरः नारदस्य समीपं गत्वा पापपरिहारमार्गं प्रार्थयते। नारदः श्रीराममन्त्रस्य उपदेशं करोति। बहुकालपर्यन्तं तपश्चरतः रत्नाकरस्य शरीरं 'वल्मीकः' आवृणोति। तस्मिन्नेव मार्गे पुनरागतः नारदः तं वल्मीकात् बहिः आगन्तुं सूचयति। वल्मीकात् आगतः रत्नाकरः 'वाल्मीकिः' इति प्रसिद्धिं प्राप्नोति।

ततः ब्रह्मणः आदेशेन सः वाल्मीकिः 'रामायणम्'इति काव्यम् अरचयत्। तत् काव्यम् 'आदिकाव्यम्' इति विख्यातम्। वाल्मीकिः 'आदिकविः' इति प्रसिद्धः अभवत्।

**प्रश्नाः**

i) पुरा रत्नाकरः कुत्र वसति स्म?

ii) नारदः कस्य मन्त्रस्य उपदेशं करोति?

iii) रत्नाकरस्य शरीरं कः आवृणोति?

iv) 'आदिकविः' इति कः प्रसिद्धः अभवत्?

**XVI. पत्रं लिखत।** **1 x 5 = 5**

44. हासनमण्डलस्य सर्वकारीयप्रौढशालायाः छात्रः/छात्रा इति मत्वा अग्रजस्य जन्मदिनस्य निमित्तम् एकदिनस्य विरामं प्रार्थ्य वर्गशिक्षकं प्रति विरामपत्रं लिखत।

**अथवा**

बेङ्गलूरुनगरस्य सर्वकारीयप्रौढशालायाः छात्रः/छात्रा इति मत्वा प्रवासार्थं धनं प्रेषयितुं निवेद्य धारवाडमण्डले विद्यमानं पितरं प्रति पत्रं लिखत।

**XVII. दशवाक्यैः प्रबन्धं लिखत।** **1 x 5 = 5**

45. i) परिसरः।

**अथवा**

ii) जनसङ्ख्यास्फोटः।